[1]चुच्या, चुच्यना, चुचुच्यिषा, चोचुच्या;
चुच्यनम्, चुच्यनम्, चुचुच्यिषणम्, चोचुच्यनम्;
चुच्यित्वा, चुच्ययित्वा, चुचुच्यिषित्वा, चोचुच्यित्वा;
प्रचुच्य्य-प्रचुच्य, प्रचुच्य, प्रचुचुच्यिष्य, प्रचोचुच्य;

| | | | |
|---|---|---|---|
| चुच्यम् २ } चुच्यित्वा २ } | चुच्यम् २ } चुच्ययित्वा २ } | चुचुच्यिषम् २ } चुचुच्यिषित्वा २ } | चोचुच्यम् २; } चोचुच्यित्वा २. } |

(535) **"चुट छेदने"** (VI-तुदादिः-1377. सक. सेट्. पर. कुटादिः ।)

चोटकः-टिका, चोटकः-टिका, चुचुटिषकः-षिका, चोचुटकः-टिका ; इत्यादीनि सर्वाण्यपि रूपाणि तौदादिककौटिल्यार्थककुटतिवत् (204) बोध्यानि ।

(536) **"चुट छेदने"** (X-चुरादिः-1613. सक. सेट्. उभ.)

चोटकः-टिका, चुचोटयिषकः-षिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिककुटधातुवत् (205) बोध्यानि । अस्य धातोरुभयपदीत्वेन, शतरि चोटयन्-न्ती, चुचोटयिषन्-न्ती-ती, चुचोटयिषिष्यन्-न्ती-ती ; इति रूपाण्यधिकानीति विशेषः । [A]विचोटी, णिनिप्रत्ययः ।

(537) **"चुटि छेदने"** (X-चुरादिः-1660. सक. सेट्. उभ.)

**"चुट"** इति क्षीरस्वामिसम्मतः पाठः ।

चुण्टकः-ण्टिका, चुचुण्टयिषकः-षिका, चुण्टकः-ण्टिका, चुचुण्टिषकः-षिका, चोचुण्टकः-ण्टिका ; इत्यादीनि सर्वाण्यपि रूपाणि चौरादिकचिन्तयतिवत् (523) बोध्यानि । इदित्करणेन णिचो वैकल्पिकत्वम् । अतः, णिजभावपक्षे, शुद्धात्-सन्नन्तात्-यङन्ताच्च रूपाणि चिन्तयतिवदेव बोध्यानि । [B]चुण्टितः ।

---

1. 'गुरोश्च हलः' (3-3-103) इति स्त्रियां भावादौ, अप्रत्ययः ।

A. 'सम्पालयेद् विमतलङ्घ्यपशुल्बभूमा क्ष्मामेष राम इव शूर्पणखा**विचोटी** ॥' धा. का. 3.22.

B. 'प्रह्लापये किमपरं **परिचुण्टितारिः** भूयोऽयमेलयति चेदिह को निषेद्धा ॥' धा. का. 3. 29.